दिनाङ्क :-30.01.2025

प्रात: - 06:55

## प्रशासनम्- सर्वदलीयोपवेशनम्

अर्थसङ्कल्पना-सत्रात् पूर्वं प्रशासनेन अद्य नवदिल्ल्याम् सर्वदलीयोपवेशनम् समाहूतम्। उपवेशनावधौ प्रशासनम् सदनस्य नेतृभिस्साकं चर्चां करिष्यति अथ च सत्रस्यास्य सुचारूतया सञ्चालनार्थं दलै: साहाय्यं सहयोगं च याचयिष्यति। ध्यातव्यमस्ति यत् जनवरीमासस्य एकत्रिंशद्दिनाङ्के संसद: उभयो: सदनयो: संयुक्तोपवेशनं राष्ट्रपतिः द्रौपदीमुर्मु: सम्बोधयिष्यति तदनु इदम् अर्थ-सङ्कल्पना-सत्रं समारप्स्यते। तस्मिन्नेव दिवसे केन्द्रीयवित्तमन्त्री निर्मला- सीतारामन् इत्येषा आर्थिक-सर्वेक्षणं प्रस्तोष्यति। यदा राष्ट्रपते: अभिभाषाणानन्तरं लोकसभा-राज्यसभे अल्पकालाय एकत्रिते भविष्यत:। वित्तमन्त्री शनिवासरे पञ्चविंशत्यधिक-द्विसहस्र-षड्विंशत्यधिकद्विसहस्र तमवर्षयो: अर्थ-सङ्कल्पना-पत्रं प्रस्तोष्यति। एतदतिरिच्य लोकसभा राज्यसभा च सोमवासरे राष्ट्रपते: अभिभाषणे धन्यवादप्रस्तावं चर्चिष्यत:। शुक्रवासरात् भविष्यमाणस्य अर्थ-सङ्कल्पनासत्रस्य प्रथमो भाग: फरवरीमासस्य त्रयोदश दिनाङ्कं यावत् प्रचलिष्यति अपि च द्वितीय: भाग: मार्चमासस्य दशदिनाङ्कत: अप्रैलमासस्य चतुर्थ-दिनाङ्कपर्यन्तं प्रचलिष्यति।

## महाकुम्भवार्ता:

उत्तरप्रदेशस्य मुख्यसचिवः आरक्षि-महानिदेशकश्च अद्य प्रयागराजनगरं गत्वा ह्य: सङ्गम-घट्टे घटिताया: घटनाया: अनन्तरं महाकुम्भस्य सुरक्षा-व्यवस्थाया: समीक्षां विधास्यत:। ह्य: जातायां घटनायां त्रिंशज्जना: मृत्युमुपगता: अथ च षष्टिजना: व्रणिता: अभवन्। व्रणितानाम् उपचार: स्थानीय-चिकित्सकीय-महाविद्यालये प्रचलति। अस्माकं वार्ताहर: सूचितवान् यत् मेलकक्षेत्रे सुरक्षाव्यवस्था संवर्धिता । उत्तरप्रदेशस्य मुख्यमन्त्रिणा योगि-आदित्यनाथेन मुख्यसचिवाय आरक्षिमहानिदेशकाय च स्थिति- सम्बद्ध-प्रतिवेदनं समर्पयितुम् आदिष्टम्। मुख्यमन्त्रिणा न्यायिक-निरीक्षणस्यापि आदेश: प्रख्यापित:। त्रिसदस्यात्मकस्य

न्यायिकायोगस्य सङ्घटनमपि कृतम्। राष्ट्रपति: उपराष्ट्रपति: प्रधानमन्त्री च महाकुम्भक्षेत्रे दिवङ्गतानां जनानां परिजनान् प्रति गभीरं शोकं प्रकटितवन्त:।

## आकरजाभियानम्

प्रशासनेन चतुस्त्रिंशत् सहस्रकोटिरूप्यकाणां व्ययेन सह राष्ट्रिय- आकरजाभियानम् अनुमोदितम् । हरितप्रौद्योगिकीनां प्रोत्साहनाय आवश्यकानां महत्त्वपूर्णानां आकरजसम्पदेभ्यः स्थितिस्थापक-मूल्यशृङ्खलायाः निर्माणाय निर्णयोऽयं विहित:। ह्यः नवदिल्ल्यां वार्ताहरान् सम्बोधयन् सूचनाप्रसारण-मन्त्री अश्विनीवैष्णवः, अर्थव्यवस्थायाः विकासाय महत्त्वपूर्णानां खनिजानां महत्त्वमुद्घाटितवान्। असौ अवोचत् यत्, ऊर्जा- सञ्चाराय कृषिक्षेत्राय रक्षायै वैद्युत्कीय-यन्त्राणां, दूरसञ्चाराय, परिवहनाय अन्तरिक्ष-यन्त्राणां, परमाणु-यन्त्राणां तथा च अन्यक्षेत्राणां कृते आकरजप्रौद्योगिकी महत्त्वपूर्णा अस्ति।

## संयुक्तराष्ट्रम् - भारतम्

अमेरिकादेशस्य ड्रेमोक्रटिक-इत्येतस्य सांसद: रो-खन्ना: उद्घोषितवान् यत् रिपब्लिकनदलस्य सांसद: रिच- मैककॉर्मिक-इत्येष: अमेरिकीयसंसदि तेन सह इण्डिया-कॉकस इत्येतस्य सहाध्यक्षतां करिष्यति। इत: पूर्वं माइकवाल्ज इत्येष: इण्डिया-कॉकस इत्येतस्य अध्यक्ष: आसीत्। यो हि सम्प्रति डोनाल्ड-ट्रम्पस्य राष्ट्रियसुरक्षापरामर्शद: अस्ति इति।

## चतुरङ्ग-क्रीडा

टाटास्टील-चतुरङ्ग- प्रतिस्पर्धायां भारतस्य डोमराजू-गुकेश: ह्य: रात्रौ नीदरलैण्डदेशस्य विज्क-आन-जी-इत्यत्र दशमे चरणे मैक्स-वार्मरडैमइत्येनं पराजितवान्।